M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1155

Title: Shira Atharva Siksa

1155

InComplete

	Shiva Atharva Sirsa		Title
			Author
			Editor
216			Year, Vols.
			Publisher
1155			Remarks

Vedic lit.

॥ भद्रं कर्णेभिः ॥ स्वस्ति न इन्द्रो ॥ ॐ शांतिः शांतिः शांतिः ॥

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ देवा ह वै स्वर्गं लोकमा
यंस्ते देवा रुद्रमपृच्छन्को भवानिति सोऽब्रवीदहमेकः
प्रथममासं वर्त्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो
व्यतिरिक्त इति सोंऽतरादंतरं प्राविशद्दिशश्चांतरं प्राविशत्
सोऽहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः
प्रत्यञ्चोऽहं दक्षिणाञ्च उदञ्चोऽहमधश्चोर्ध्वश्चाहं
दिशश्च प्रदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं सावि

त्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाहं छंदोऽहं सत्यो
ऽहं गार्हपत्यो दक्षिणाग्निराहवनीयोऽहं गौर्यहमृ हं२
२२ ग्अहं यजुरहं सामाहमथर्वांगिरसोऽहं ज्येष्ठोऽहं श्रेष्ठोऽहं व
रिष्ठोऽहमापोऽहं तेजोऽहं गुह्योऽहमरण्योऽहमक्षरमहं क्ष
रमहं पुष्करमहं पवित्रमहमुग्रं च बहिश्च पुरस्ताज्ज्यो
तिरित्यहमेव सर्वेभ्यो मामेव स सर्वः स मां यो मां वेद स
देवान्वेद सर्वांश्च वेदान् सांगानपि ब्रह्म ब्राह्मणैश्च

गांगोभिर्श्रोत्रयानृश्रोत्रमण्येनहविर्हविर्घ्यायु
पु२ र्घासत्येनसत्यंधर्मेणधर्मंतर्पयामिस्वेनतेज
सातेनोहवैतेदेवारुद्रपप्रच्छंस्तेदेवारुद्रमपृच्छंस
देवारुद्रमध्यायंस्तेदेवाऊर्ध्वबाहवोरुद्रंस्तुन्वं
ति॥१॥योवैरुद्रःसभगवान्यश्चब्रह्मास्तस्मैन वै
मोनमः॥१॥ॐ योवैरुद्रःसभगवान्यश्चविष्णुः
स्तस्मै०॥२॥ओं योवैरुद्रःसभ०॥स्कंदस्तस्मै०३॥ २

वा२

रमृतमर्त्यस्य॥सोमःसूर्यःपुरस्तात्सूक्ष्मःपु
रुषःसर्वंजगद्धितंवाएतदक्षरंप्राजापत्यंसौ
म्यंसूक्ष्मंपुरुषंग्राह्यमग्राह्येनभावंभावे
नसौम्यंसौम्येनसूक्ष्मंसूक्ष्मेणवायव्यंवा
यव्येनग्रसतितस्मैमहाग्रासायवैनमोन
मः॥हृदिस्थादेवताःसर्वाहृदिप्राणाःप्र
तिष्ठिताः॥हृदित्वमसियोनित्यंतिस्रोमा

त्राः पुरस्तुसः॥ तस्योत्तरतः शिरोदक्षिणतः पा
दौ य उत्तरतः॥ स ओंकारो य ओंकारः स प्रणवो
यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोनंतो
यो नंतस्तत्तारं यत्तारं तच्छुक्लं यच्छुक्लं तत्सू
क्ष्मं यत्सूक्ष्मं तद्वैद्युतं यद्वैद्युतं तत्परं ब्रह्म य
त्परं ब्रह्म स एको य एकः स रुद्रो यो रुद्रः स ईशा
नो य ईशानः स भगवान्महेश्वरः॥ ३॥ अथ क
स्मादुच्यत ओंकारो यस्मादुच्चार्यमाण एव

प्राणानूर्ध्वमुत्क्रामयति तस्मादुच्यत ओंका
रोथ कस्मादुते प्रणवो यस्मादुच्चार्यमाण ए
व ऋग्यजुःसामाथर्वांगिरसं ब्रह्म ब्राह्मणे
भ्यः प्रणामयति नामयति च तस्मादुच्यते प्र
णवोथ कस्मादुच्यते सर्वव्यापी यस्मादुच्चार्य
माण एव यथा स्नेहेन पललपिंडमिव शांतरूप
मोतप्रोतमनुप्राप्तो व्यतिषक्तश्च तस्मादुच्य
ते सर्वव्याप्यथ कस्मादुच्यते नंतो यस्मादुच्चार्य

माणएवतिर्यगूर्ध्वमधस्ताच्चप्रस्यांतोनोपलभ्यतेय
स्मादुच्यतेनंतोथकस्मादुच्यतेतारंयस्मादुच्चार्य
माणएवगर्भजन्मव्याधिजरामरणसंसारमहा
भयात्तारयतित्रायतेतस्मादुच्यतेतारमथकस्मा
दुच्यतेशुक्लंयस्मादुच्चार्यमाणएवक्लंदतेक्ल
मयतेतस्मादुच्यतेशुक्लमथकस्मादुच्यतेसूक्ष्मं
यस्मादुच्चार्यमाणएवसूक्ष्मोभूत्वाशरीराण्यधि ६
तिष्ठतिसर्वाणिचांगान्यभिमृशन्तितस्मादुच्यते

सूक्ष्ममथकस्मादुच्यतेवैद्युतंयस्मादुच्चार्यमाणएव
व्यक्तेमहतितमसिद्योतयतितस्मादुच्येवैद्युतमथकस्मा
दुच्यतेपरंब्रह्मयस्मात्परमपरंपरायणंचबृहद्बृहत्या
७ बृंहयतितस्मादुच्यतेपरंब्रह्माथकस्मादुच्यतएकोयः
सर्वान्प्राणान्संभक्ष्यसंभक्षणेनाजःसंसृजतिविसृ
जतिविसृजतिचतीर्थमेकेव्रजंतितीर्थमेकेदक्षिणाः
प्रत्यंचउदंचःप्रांचोभिव्रजंत्येकेतेषांसर्वेषामिह

हसंगतिःसाकंसएकोभूतश्चरतिप्रजानान् तस्मादुच्य
तएकोथकस्मादुच्यतेरुद्रोयस्मादृषिभिर्नान्यैर्भक्तैर्द्रु
तमस्यरूपमुपलभ्यतेतस्मादुच्यतेरुद्रोथकस्मादुच्य
तईशानोयःसर्वान्देवानीशतईशानीभिर्जननी
भिश्चशक्तिभिः॥ अभित्वाशूरनोनुमोदुग्धाइवधे
नवः॥ ईशानमस्यजगतःस्वर्दृशमीशानमिंद्रतस्थु
षः॥ इतितस्मादुच्यतईशानोथकस्मादुच्यतेभ

गवान्महेश्वरोयस्माद्भक्तान्ज्ञानेनभजत्यनुगृह्णा
तिवाचंसंसृजतिविसृजतियैचेसर्वान्भावान्परि
त्यज्यात्मज्ञानेनयोगैश्वर्येणमहतिमहीयतेतस्मा
दुच्यतेभगवान्महेश्वरस्तदेतद्रुद्रचरितं॥४॥एको
हदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भेअं
तः॥ सएवजातःसजनिष्यमाणःप्रत्यंजनास्तिष्ठ
तिसर्वतोमुखः॥ एकोरुद्रोनद्वितीयायतस्थेय

इमांल्लोकानीशतईशानीभिः॥ मसंजनास्तिष्ठतिसंचु
कोचांतकालेसंसृज्यविश्वाभुवनानिगोप्ता॥ योयोनिं
योनिमधितिष्ठत्येकोयेनेदंसंचविचैतिसर्वं॥ तमी
शानंवरदंदेवमीड्यंनिचाय्येमांशांतिमत्यंतमेति॥
क्षमांहित्वाहेतुजालस्यमूलंबुद्ध्यासंचितंस्थाप
यित्वातुरुद्रेरुद्रमेकत्वमाहुः॥ रुद्रोहिशाश्वतेनवैपुरा
णाभिषमूर्जेणपशावोनुनामयंतंमृत्युपाशान्॥ तदे

८

तेनात्मन्नेतेनार्द्धंचतस्रमात्रेणशांतिंसंसृजति
पाशविमोक्षणं॥ यासाप्रथमामात्राब्रह्मदेवत्यार
क्तावर्णेनयस्तांध्यायतेनित्यंसगछेद्ब्रह्मपदं॥ या
साद्वितीयामात्राविष्णुदेवत्याकृष्णावर्णेनयस्तां
ध्यायतेनित्यंसगछेद्वैष्णवंपदं॥ यासातृतीयामात्रे
शानदेवत्याकपिलावर्णेनयस्तांध्यायतेनित्यंस
गछेदैशानंपदं॥ यासार्द्धचतुर्थीमात्रासर्वदेवत्या

व्यक्तीभूताखंविचरतिशुद्धस्फटिकसंनिभावर्णेनय
स्तांध्यायेतनिसंसगच्छेत्स्वदेर्मैनोकंनरेतदुपासीतमु ग्रु२
नयोवाग्वदंतिनतस्यगहणमयंपंथाविहितउत्त
रेणयेनदेवायांतियेनपितरोयेनऋषयःपरमपरंप
रायणंचेति॥वालाग्रमात्रंहृदयस्यमध्येविश्वंदे
वंजातरूपंवरेण्यं॥तमात्मस्थंयेनुपश्यंतिधीरा
स्तेषांशांतिर्भवतिनेतरेषां॥यस्मिन्क्रोधंयांच
तृष्णांक्षमांचतृष्णांछित्वाहेतुजालस्यमूलंबु

ध्यासिंचितंस्थापयित्वातुरुद्रेरुद्रमेकत्वमाहुः॥रु
द्रोहिशाश्वतेनपुराणेनषमूर्जेणतपसानियंता॥
अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थ
लमितिभस्मव्योमेतिभस्मसर्वंहवाइदंभस्ममनए
तानिचक्षूंषियस्माद्व्रतमिदंपाशुपतंयद्भस्मनांगा
निसंस्पृशेत्तस्माद्ब्रह्मनदेतत्पाशुपतंपशुपाशवि
मोक्षणाय॥५॥यो[illegible]अग्नौरुद्रोयोऽप्स्वंतर्य
ओषधीर्वीरुधआविवेश॥यस्माविश्वाभुवनानि

चाकॢपे तस्मै रुद्राय नमो अस्त्वग्नये ॥ यो रुद्रो अग्नौ
यो रुद्र ओषधीर्वीरुध आविवेश ॥ यो रुद्र इमा विश्वा
भुवनानि चाकॢपे तस्मै रुद्राय वै नमो नमः ॥ यो रुद्रो
अप्सु यो रुद्र ओषधीषु यो वनस्पतिषु ॥ येन रुद्रे
ण जगदूर्ध्वं धारितं पृथिवी द्विधा त्रिधा धर्त्ता धारि
ता नागा येऽन्तरिक्षे तस्मै रुद्राय वै नमो नमः ॥ मू
र्धानमस्य संसीव्याथर्वा हृदयं च यत् ॥ मस्तिष्का १०
दूर्ध्वः प्रेरयत्पवमानोधिशीर्षतः ॥ तद्वा अथर्व

णः शिरो देवकोशः समुब्जितः ॥ तत्प्राणो अभिरक्ष
ति शिरो अन्नमथो मनः ॥ न च दिवो देवजनेन गुप्ता न
चांतरिक्षाणि न च भूम इमाः ॥ यस्मिन्निदं सर्वमोत
प्रोतं यस्मादन्यं न परं किंचनास्ति ॥ न तस्मात्पूर्वं न
४रं प[illegible]न भूतं नोत भव्यं यदासीत् सहस्रपादेकमूर्धा
व्याप्तं स एवेदमावरीवर्ति भूतं ॥ अक्षरात्संजायते का
लः कालाद्व्यापक उच्यते ॥ व्यापको हि भगवान्रु
द्रो भोगायमानो यदा शेते रुद्रस्तदा संहार्यते प्र

ते॰ जाः॥ उच्छ्वसिते तमो भवति तमसः आपो अप्सु
गुल्मा मथिते मथितं शिशिरे शिशिरं मथ्यमानं फे
नो भवति फेनादंडं भवत्यंडाद्ब्रह्मा ब्रह्मणो वायुर्वायोरों
कार ओंकारात्सावित्री सावित्र्या गायत्री गायत्र्या
लोका भवंत्यर्चयंति तपः सत्यं मधु क्षरंति यध्रुव
मेतद्धि परमं तपः॥ आपो ज्योती रसोऽमृतं ब्रह्म भू
र्भुवः स्वरों नम इति॥ ६॥ य इदं मथर्वशिरो ब्राह्म

णो धीते श्रोत्रियः श्रोत्रियो भवत्यनुपनीत उपनी
तो भवति सोऽग्निपूतो भवति स वायुपूतो भवति स सूर्य
पूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स
सर्वपूतो भवति स सर्वैर्देवैर्ज्ञातो भवति स सर्वैर्वेदै
रनुध्यातो भवति स सर्वेषु तीर्थेषु स्नातो भवति तेन स
र्वैः क्रतुभिरिष्टं भवति गायत्र्याः षष्टिसहस्राणि
जप्तानि भवंति प्रणवानामयुतं जप्तं भवत्या च
क्षुषः पंक्तिं पुनात्या सप्तमात्पुरुषयुगात्पुना
तीतिहासपुराणानां रुद्राणां शतसहस्राणि जप्ता [illegible]

३ ॐ भद्रं कर्णेभिः ॥१॥ स्वस्ति न इंद्रो ॥१॥ ॐ शांतिः शांतिः शांतिः ॥ ३

तीत्याह भगवानथर्वशिरः सकृज्जप्त्वैव शुचिः पूतः क
र्मण्यो भवति द्वितीयं जप्त्वा गणाधिपत्यमवाप्नोति तृ
तीयं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्यं ॥ ७ ॥ इ
त्यथर्ववेदे शिवाथर्वशीर्षं समाप्तं ॥ शुभं भवतु ॥